वता रेवन्त: । सर्व्वैरेव निकुम्भ: पूज्य: । महा-
र्णवे लिङ्गपुराणम् ।
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सद्वेशो अक्षैर्जागरणञ्चरेत् ॥"
तथा,—
"निशीथे वरदा लक्ष्मी: को जागर्त्तीतिभाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षै: क्रीडां करोति य: ।
नारिकेलैश्चिपिटकै: पितॄन् देवान् समर्च्चयेत् ।
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् ॥"
अत्र निशीति निशीथ इति चाभिधानादाचि-
कृत्यमिदम् ।
"तत: प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"
इति संवत्सरप्रदीपधृतवत्सवचनात् ॥
यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी
तद्दिने कोजागरकृत्यम् । उभयव्याप्त्यनुरोधात् ।
यदा तु पूर्व्वदिने निशीथव्याप्ति: परदिने प्रदोष-
व्याप्तिस्तदा परेद्युस्तत्कृत्यम् । प्रधानपूजाकाल-
व्याप्त्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथव्याप्ति:
परेद्युर्न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्-
कृत्यम् ।
"अह:सु तिथय: पुण्या: कर्म्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥"
इति वचनात् ॥
वर्णयेदित्यनुवृत्तौ मत्स्यसूक्ते ।
"महालक्ष्मीस्तु तुलसीं भिण्डिकां काञ्चन-
प्रभा ॥"
लक्ष्मीध्यानमादित्यपुराणे ।
"पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययो: ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ।
रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु ॥"
पाशेति । दक्षिणे पाशाक्षमालाभ्यां वामे पद्मा-
ङ्कुशाभ्यां भूषितां वामकरे हेमपद्मं दक्षिणकरे
वरं दधतीमर्थ: । तत: पाद्यादिभि: संपूज्य,—
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ॥
इन्द्रध्यानमादित्यपुराणे ।
"चतुर्द्दन्तगजारूढो वज्रपाणि: पुरन्दर: ।
शचीपतिश्च ध्यातव्यो नानाभरणभूषित: ॥"
पाद्यादिभि: संपूज्य,—
"ॐ विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नम: ॥"
इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् । तत: कुवेर:
संपूज्य: । इति रुद्रधर: ॥ तं पाद्यादिभि:
संपूज्य,—
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पद: ॥"
इति प्रणमेत् ॥

अत्र प्रदोषे सर्व्वेषां पूजेति रुद्रधरप्रभृतय: ॥ न
च निकुम्भपर्य्यन्तानां पूर्व्वाह्ण एव पूजनं निरप-
वादमिति वाच्यम् । दिवा तत्र न भोक्तव्यं
इत्युपक्रम्य पूज्याश्च सफलै: पक्वैरित्यादिना
विशिष्य पूजामभिधाय भोक्तव्यमित्यभिधानात्
रात्रावेव पूजाभोजने अवगम्येते । अतएवा-
शक्तानामेव भोक्तव्यं पूजितै: सुरैरित्यनेन
विशिष्य दिवा पूजाभोजने विहिते ॥ * ॥
योगिनीतन्त्रे ।
"विरिञ्चिस्तु गृहे ढक्कां घण्टां लक्ष्मीगृहे त्यजेत् ।
सर्व्ववाद्यमयी घण्टा वाद्याभावे तु वादयेत् ॥"*॥
लक्ष्मीवाक्यम् ।
"प्रकीर्णभाण्डामनवेक्ष्य कारिणीं
सदा च भर्त्तु: प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्जयामि ॥"
मार्कण्डेय: ।
"शिर: सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
मातुश्चास्मि गृहे यत्र अहोरात्रञ्च तिष्ठति ।
तत्रालक्ष्मि ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥
शूर्पदात्रादिकं यत्र पदाकर्षैस्तथासनम् ॥"
हरिवंशे ।
"यत्र ह्री: श्री: स्थिता तत्र यत्र श्रीस्तत्र सन्नति: ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ॥"
मत्स्यपुराणे ।
"स्थिरो हि यो हि पुरुष: स्थिरश्रीरेव जायते ।
रक्षितुं नैव शक्नोति चपलश्चपलां श्रियम् ॥"
तथा,—
"अवश्यमुद्योगवतां श्रीरपारा भवेत् सदा ।
अमृतप्रोत्साहिता देवा ममन्थु: पुनरम्बुधिम् ॥"
कृत्यकौमुद्याम् ।
"नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि ।
तस्मै वित्तं प्रयच्छामि को जागर्त्ति महीतले ॥"
अक्षक्रीडायां व्यासयुधिष्ठिरसंवाद: प्रचरति ।
तत्क्रीडा चतुरङ्गशब्दे द्रष्टव्या ॥ * ॥ वैशाखा-
न्तेति स्कन्दपुराणम् ।
"मौष्यान्तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य देवेन्द्र ! पूजा विष्णोर्विधीयते ॥"
इति । पौर्णमास्यन्तमासमुपक्रम्य ।
"पितॄणां देवतानाञ्च मूलकं नैव दापयेत् ।
ददन्नरकमाप्नोति भुञ्जीत ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।
अन्यथा नरकं याति चान्त्यो विट् शूद्र एव च ॥
वरं भक्ष्यमभक्ष्यञ्च पिवेद्वा गर्हितञ्च यत् ।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥"*॥
फाल्गुने दोलयात्रामाह तीर्थचिन्तामणौ ब्रह्म-
पुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"

स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये ऊनविंशा-
ध्याये ।
"फाल्गुन्यां क्रीडनं कुर्य्यात् दोलायां मम
भूमिप ! ॥"
इति तिथितत्त्वम् ॥ * ॥
तस्या: पर्व्वत्वं पर्व्वशब्दे द्रष्टव्यम् ॥
पूर्त्तं, क्ली, ( पॄ पालने + भावे क्त: । "न ध्याख्या-
पृमूर्च्छिमदाम् ।" ८ । २ । ५७ । इति निष्ठा-
तस्य न नत्वम् । ) पालनम् । इति शब्दरत्ना-
वली ॥ ( पिपर्त्ति पालयत्यनेन जीवानिति ।
पॄ + करणे क्त: । ) खातादिकर्म्म । इत्यमर: ।२।
७ । २८ ॥ आदिना देवकुलादि । तदुक्तम् ।
"पुष्करिण्य: सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्त्तं कर्म्म विनिर्द्दिशेत् ॥"
इति भरत: ॥
तत्करणफलम् ।
"इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्ते मोक्षञ्च विन्दति ॥
वापीकूपतडागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥"
इति वराहपुराणम् ॥ * ॥
वापीत्वादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकार-
माह जातूकर्ण्य: ।
"वापीकूपतडागादि देवतायतनानि च ।
अन्नप्रदानमारामा: पूर्त्तमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्म: सामान्य उच्यते ।
अधिकारी भवेत् शूद्र: पूर्त्ते धर्म्मे न वैदिके ॥"
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-
कर: ॥ एवं स्त्रीणामपि पूर्त्ताधिकार: । यथा
नारीत्यनुवृत्तौ बृहस्पति: ।
"पितृव्यगुरुदौहित्रान् भर्त्तु: स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रिय: ॥"
इति जलाशयतत्त्वम् ॥
(पूर्त्तं खातादिकर्म्म अङ्गत्वेनास्त्यस्येति । अच् ।
धर्म्मविशेषे, पुं । यथा, मार्कण्डेये । १३ । १५ ।
"यतस्ते विमुखा यान्ति निश्वस्य गृहमेधिन: ।
तस्मादिष्टञ्च पूर्त्तञ्च धर्म्मौ द्वावपि नश्यत: ॥")
पूर्त्त:, त्रि, ( पॄ + कर्म्मणि क्त: ) पूरित: । छन्न: ।
इति विश्व: ॥ ( यथा, भागवते ।३।२४।३१।
"ऐश्वर्य्यवैराग्ययशोऽवबोध-
वीर्य्यश्रिया पूर्त्तमहं प्रपद्ये ॥" )
पूर्त्ति:, स्त्री, पूरणम् । पॄधातोर्भावे क्ति: । इति
व्याकरणम् ॥ ( यथा, ऋग्वेदे । ६ । १३ । ६ ।
"विश्वाभिर्गीर्भिरभि पूर्त्तिमश्यां
मदेम शतहिमा: सुवीरा: ॥" )
पूर्व्व, क निकेतने । इति कविकल्पद्रुम: ॥ (चुरा०-
पर०-निमन्त्रणे सक०-निवासे अक०-सेट् । )
मञ्जुस्वरी । निकेतनमिह निमन्त्रणं निवासो वा ।
कं, पूर्व्वयति द्विजान् भोक्तुं गृही । पूर्व्वयति
तीर्थेषु साधु: । इति दुर्गादास: ॥ वर्ण्यवान्तो-
ऽयम् ॥